## ३६ षट्त्रिंश दशकः - मूलप्रकृति महिमा

त्वमेव मूलप्रकृति स्त्वमात्मा त्वमस्यरूपा बहुरूपिणी च ।
दुर्गा च राधा कमला च सावित्रि आख्या सरस्वत्यपि च त्वमेव ॥ ३६-१॥

दुर्गा जगद्दुर्गति नाशिनी त्वं श्रीकृष्णलीला रसिकाऽसि राधा ।
शोभा स्वरूपाऽसि गृहादिषु श्रीः विद्यास्वरूपाऽसि सरस्वती च ॥ ३६-२॥

सरस्वती हा गुरुशाप नष्टां त्वं याज्ञवल्क्याय ददाथ विद्याम् ।
त्वामेव वाणी कवचं जपन्तः प्रसाध्य विद्यां बहवोऽधिजग्मुः ॥ ३६-३॥

त्वं देवि सावित्र्यभिधां दधासि प्रसादतस्ते खलु वेदमातुः ।
लेभे नृपालोऽश्वपति स्तनूजां नाम्ना च सावित्र्यभवत्किलैषा ॥ ३६-४॥

सा सत्यवन्तं मृतमात्म कान्तं आजीवयन्ती श्वशुरं विधाय ।
दूरीकृतान्ध्यं तनयानसूत यमाद्गुरोराप च धर्मशास्त्रम् ॥ ३६-५॥

स्कन्दस्य पत्नी खलु बालकाधि-ष्ठात्री च षष्ठीति जगत्प्रसिद्धा ।
त्वं देवसेना धनदाऽधनानां अपुत्रिणां पुत्रसुखं ददासि ॥ ३६-६॥

सत्कर्म लब्धे तनये मृते तु प्रियव्रतोऽदूयत भक्तवर्यः ।
तं जीवयित्वा मृतमस्य दत्वा स्वभक्त वात्सल्य मदर्शयस्त्वम् ॥ ३६-७॥

त्वमेव गङ्गा तुलसी धरा च स्वाहा स्वधा त्वं सुरभिश्च देवि ।
त्वं दक्षिणा कृष्णमयी च राधा दधासि राधामय कृष्णतां च ॥ ३६-८॥

त्वं ग्रामदेवी नगराधिदेवी वनाधिदेवी गृहदेवता च ।
सम्पूज्यते भक्तजनैश्च या या सा सा त्वमेवासि महानुभावे ॥ ३६-९॥

यद्यच्छ्रुतं दृष्टमपि स्मृतं च तत्तत्त्वदीयं हि कलांशजालम् ।
न किञ्चनास्त्येव शिवे त्वदन्यत् भूयोऽपि मूलप्रकृते नमस्ते ॥ ३६-१०॥